© 2018 IJSRSET | Volume 4, Issue 1, January-February-2018
Print ISSN: 2395-1990 | Online ISSN : 2394-4099 | Page No : 1738-1743

# आप्तवाक्याधिगमस्य संज्ञानात्मकाधिगमसिद्धान्तैः सहतौलनिकम् अध्ययनम् ।



**डॉ. बि. पद्ममित्रश्रीनिवासः**
सहाचार्यः, राष्ट्रियसंस्कृतसंस्थानम्
(मा.वि.) श्रीसदाशिवपरिसरः, पुरी।

**सारांशः**- मानवःजन्मतःमृत्युपर्यन्तं किमपिअधिगत्छति। । शैशव-बाल्य-कौमार-यौवन-प्रौढ-वार्धक्यादिष्ववस्थासु तस्य अधिगमेविषयवस्तुनः, शैल्याः, वेगस्य च परिवर्तनंभवति। कदाचित् ज्ञानं, कदाचित्कौशलानि, कदाचित्अर्थबोधञ्चप्राप्नोति। एतेष्वधिगमकार्येषुप्रत्यक्ष-अनुमान-उपमान-शब्द-अर्थापत्ति-अनुपलब्धयइति षट्प्रमाणानिसाधनभूतानिभवन्ति। एतेषुप्रमाणेषुशब्दप्रमाणम् अत्यन्तं प्रमुखःभवति । अनेनशब्दप्रमाणेनैवमानवाः अत्यधिकं ज्ञानंप्राप्नुवन्ति । एतस्य शब्दप्रमाणस्यैव आप्तवाक्यम्, आप्तवचनम्आप्तोपदेशःइति पर्यायपदानि भारतीयदर्शने समुपलभ्यन्ते । उक्तञ्चतर्कसंग्रहे''
**आप्तवाक्यं शब्द** : ''इति।एतानि भारतीयदर्शनान्याश्रित्य आचार्याः पेरिसुब्बारायन्महोदयाः आप्तवाक्याधिगमः (Learning by verbal testimony) इतिनवीनाधिगमसिद्धान्तं प्रत्यपादयन् ।आप्तवाक्याधिगमस्य प्रधानतया पञ्चसोपानानिसन्ति।प्रस्तुतशोधपत्रे आप्तवाक्याधिगमसिद्धान्तस्य पाश्चात्यैः संज्ञानात्मकाधिगमसिद्धान्तैः सह तौलनिकमध्ययनं क्रियते।

**मुख्यपदानि** - आप्तः, आप्तवाक्यम् , अधिगमः, संज्ञानात्मकसिद्धान्ताश्च।

## १. आप्तवाक्याधिगमस्य स्वरूपम्

भारतीयतत्त्ववेत्तारः शब्दप्रमाणेअधिकंविश्वसन्ति । तन्मतेशब्दप्रमाणंप्रमितौ (Accurate Knowledge) साधनंभवति । अर्थात् विश्वसनीयव्यक्तेः वचांसिश्रोतरिअधिगमं जनयन्ति । सैव विश्वसनीयव्यक्तिः आप्तइति कथ्यते । यः सर्वज्ञःवर्तते, यः स्वज्ञानम् अन्येभ्यः उपदेष्टुमिच्छति, तथाविषयबोधने समर्थश्च सःआप्तइति कथ्यते । यथोक्तं मुक्तावलीव्याख्याने रामरुद्रीये - *''प्रकृतवाक्यार्थविषयक-यथार्थज्ञानप्रयोज्यशब्दोच्चारणकर्ताआप्तः''*इति, न्यायसूत्रेषु''आप्तोपदेशःशब्दः'' इति, न्यायसूत्रभाष्यकारः ''आप्तःखलुसाक्षात्कृतधर्मा यथादृष्टस्यार्थस्य चिख्यापयिषयाप्रयुक्त-उपदेष्टा''इति आप्तस्य लक्षणानिविद्यन्ते। अर्थात् यः विश्वसनीयः, पदार्थानां यथार्थतत्त्वज्ञः, यः स्वज्ञानम् अन्येभ्यः बोधयितुमिच्छति, शिक्षणकार्ये समर्थश्च सःआप्तइति कथ्यते ।

एवञ्च प्रामाणिकव्यक्तेः वचांसि जीवस्य ज्ञानेबोधे क्रियायाञ्च परिवर्तनम् आनयन्ति । यथा - वयं भाषायाः विज्ञानपर्यन्तं सर्वमपि ज्ञानं शिक्षकेभ्यः एवप्राप्नुमः । नित्यजीवने अस्माकंभावाः, विश्वासाः, मूल्यानि, इच्छाश्च आप्तवचनैः (पितृभिः शिक्षकैश्च) प्रभाविताःभवन्ति । प्रपञ्चेनकोऽपिजनः पाणिनीयसूत्राणि प्रायोगिकपद्धत्या अधिगच्छति, परन्तु आचार्यादेव। नकदापि वयं स्वतन्त्रभारतस्य प्रथमराष्ट्रपतिंसर्वेपल्लिराधाकृष्णन्महोदयम् अपश्याम अमिलाम च,परन्तु तस्य विषये जानीमः। कथम् ? आप्तवचनात् ।

© 2018 IJSRSET | Volume 4, Issue 1, January-February-2018
Print ISSN: 2395-1990 | Online ISSN : 2394-4099 | Page No : 1738-1743

## १.१. आप्तवाक्याधिगमस्य मनोवैज्ञानिकप्रक्रिया –

मनुष्यस्य व्यवहारः जीवनस्य प्राथमिकावस्थाभ्यः विविधसन्दर्भेषु विधिवाक्यैः (शब्दैः) निबन्धितःभवति । यदा लिङ्लोट्तव्यदादिप्रत्ययसहितं विधिवाक्यं शृणोतितदा व्यक्तेः मस्तिष्के कार्योन्मुखप्रक्रिया आरभ्यते । लिङादीन् विहाय विहितः वाक्यप्रयोगः केवलविषयं बोधयति । एतेनश्रोता कार्योन्मुखः नभवति । परन्तु यदि तदेववचनंलिङादिसहितंभवतितर्हिश्रोता कार्योन्मुखः भवतिअथवा कार्यपरित्यागं करोति । अयमेव सिद्धान्तः आप्तवाक्याधिगमप्रक्रियायाः भाषिकमनोवैज्ञानिकाधारः (Psycho-linguistic principle) वर्तते ।

मनोविज्ञानस्य सन्दर्भेकस्मिंश्चिदधिगमपरिवेषेभाषिकमनोवैज्ञानिकसिद्धान्तंशाब्दिकनिबन्धने प्रयुञ्ज्महे । यदा मनुष्यः समस्यामनुभवति, तदापरिष्कारोपायन् अन्विषति । तस्य जीवस्य यत्किञ्चित् प्रवेशव्यवहारः वर्तते । सः आवश्यकतामनुभूय समस्यापरिष्काराय कञ्चनपुरुषम्आप्तं विचिन्त्य विश्वासेनतमुपगच्छति । आप्तः समस्यायाः समाधानं विचिन्त्य लिङादिप्रत्ययैः मनुष्यम् उपदिशति । एतेनसःअभिप्रेरितस्सन् कार्यतत्परः भवति । एवञ्चतस्मिन् व्यवहारपरिवर्तनं जायते, अर्थात्अधिगमः जायते ।

## १.२. आप्तवाक्याधिगमस्य सोपानानि (Steps in Aaptavakyam learning)-

आचार्यपेरिवर्याणांमते आप्तवाक्याधिगमस्य इमानिसोपानानिवर्तन्ते –

१. **समस्यायाः अभिज्ञानम्** (Awareness of the problem) । प्रथमसोपानेव्यक्तिः स्वयं समस्याम् अभिजानातिअथवा व्यक्तिविशेषेआप्तः समस्याम् उत्पादयति । यदा व्यक्तौ समस्याभिज्ञानं स्वयं जायते तदा व्यक्तिः स्वयंप्रेरणया लक्ष्यसाधनाय प्रयतते । यदा व्यक्तिः निष्क्रियः सती समस्यामेव नजानाति ; तदाआप्तः समस्याम् अभिज्ञाय तां व्यक्तिं कार्योन्मुखां कारयति । पूर्वोक्तसन्दर्भयोः यदि आप्तवाक्यं न स्यात् तर्हि व्यक्तिः समस्यापरिष्कारे अवश्यं काठिन्यमनुभवेत् अथवाअनुकूलतांनलभेत ।


२. **लक्ष्यप्राप्तये व्यूहनिर्माणम्** (Develop a strategy for achieving goal) । ततःपरं व्यक्तिः व्यूहनिर्माणाय प्रयतते । तस्मिन् व्यूहनिर्माणे आप्तः व्यक्तेः वैयक्तिकविभेदान् मनसि निधाय संपूर्णतया अथवा पाक्षिकतया मार्गदर्शनंकरोति ।

३. **आप्तवाक्यस्य अङ्गीकारः** (Acceptance of the Aptavakyam) । जीवः समस्यासमाधाने आप्तस्य वचनम् अङ्गीकरोति । परन्तु स चाङ्गीकारः व्यक्तेः आप्ते विद्यमानविश्वास–गौरवयोः अवलम्बते । यदि व्यक्तिः आप्तं संपूर्णतया विश्वसिति, तस्य उपदेशमपि संपूर्णतया अङ्गीकरोति । यदि व्यक्तिः आप्तं पाक्षिकतया विश्वसिति, तस्य उपदेशमपि पाक्षिकतया अङ्गीकरोति । प्रौढाः व्यक्तयः आप्तवचनंश्रुत्वास्वानुभवेन, तर्केण, बुद्धिशक्त्या च विश्लिष्य आप्तवचनमङ्गीकुर्वन्ति ।

४. **योजनायाः कार्यान्वयः** (Implementation of strategy) । व्यक्तिः संपूर्णतया अथवा पाक्षिकतया आप्तवचनम् अङ्गीकृत्य कार्यम्आरभते । योजनायाः अथवा आप्तोपदेशस्य कार्यान्वयनवेलायां सा व्यक्तिः आवश्यकतानुसारं स्वेच्छया योजनायाः नवीकरणंकर्तुमर्हति ।

५. **व्यवहारपरिवर्तनम्** (Change in behaviour) । इत्थं व्यूहस्य कार्यान्वयनेन व्यक्तौ व्यवहारपरिवर्तनं जायते अर्थात्अधिगमः जायते।

© 2018 IJSRSET | Volume 4, Issue 1, January-February-2018
Print ISSN: 2395-1990 | Online ISSN : 2394-4099 | Page No : 1738-1743




**चित्रम्** – आप्तवाक्याधिगमस्य प्रक्रिया

आप्तवाक्याधिगमस्य शिशुविकासे, मार्गदर्शन–परामर्शयो:, वेदाध्ययने, शास्त्राणामध्यापने मूल्यशिक्षायां शिक्षकप्रशिक्षणे संप्रत्ययाधिगमे दूरस्थशिक्षायाञ्च प्रयोग: समर्थतया क्रियते चेत्उत्तमफलितानिप्राप्तुं शक्यत इति आचार्यपेरिसुब्बरायन्–महोदयानामाशय: ।

## १.आप्तवाक्याधिगमस्य संज्ञानात्मकसिद्धान्तै: सहतुलना

आप्तवाक्याधिगमसिद्धान्तस्य अधोनिर्दिष्टै:अधिगमसिद्धान्तै: सह तुलना क्रियते । सिद्धान्तस्यास्य गानेमहोदयस्य अनुक्रमाधिगम:(Gagne's Hierarchi of Learning),टोल्मन् महोदयस्य सप्रयोजनव्यवहारवाद: (Tolmnan's purposive behaviourism), पियाजे–महोदयस्य विकासाश्रिताधिगम:(Piaget's Developmental based learning), ब्रूनरमहोदयस्य अन्तर्दृष्ट्यधिगम:(Bruner's Learning insights) इत्येतै: सिद्धान्तै: सह तुलना क्रियते ।

### १.१. आप्तवाक्याधिगम: तथा गानेमहोदयस्य अनुक्रमिताधिगमसिद्धान्त: ।

गानेमहोदय: अनुक्रमिताधिगमसिद्धान्तंप्रतिपादितवान् । तत्र अधिगमस्य पञ्चअवान्तरप्रकारान्प्रोवाच । ते शाब्दिकज्ञानं(र्ञेत घ्र्दिर्स्रिदह),बौद्धिककौशलानि(Intellectual Skills), संज्ञानात्मकव्यूहा: (Cognitive Strategies), चलनकौशलानि (Motor Skills) अभिवृत्तय: (Attitude) चेति । एतेषुशाब्दिकज्ञानम् अध्येतु: ज्ञानेच्छांनिर्दिशति । आप्तवाक्याधिगमोऽपि अधिगमेतादृशक्रमंनिर्दिशति । यथा – समस्याया: अभिज्ञानं, बौद्धिकनिर्णय:, अभिवृत्तय:, संज्ञानात्मकव्यूहा:, चलनकौशलानि । एवञ्च गानेमहोदयस्य अनुक्रमाधिगमे आप्तवाक्याधिगमे च अधिगमप्रक्रिया प्राय: समानावर्तते ।

गाने महोदय: अधिगमस्य अष्टौप्रकारान्प्रतिपादितवान् । ते यथा –

१) सङ्केताधिगम:(Signal learning)

२) प्रेरक–प्रतिक्रियाधिगम: (S-R learning)

३) शृङ्खलाधिगमः(Chain learning)

४) शाब्दिकसाहचर्यम्(Verbal association)

५) विभेदीकरणाधिगमः(Discrimination learning)

६) संप्रत्ययाधिगमः(Concept learning)

७) नियमाधिगमः (Rule learning) इति ।

८)समस्यासमाधानम्( Problem-solving) इति ।

एतान् अष्टप्रकारानाश्रित्य नाडीमण्डलेपरिवर्तनानि जायन्ते । एतेषुअष्टसुप्रकारेषुउत्तरोत्तराधिगमप्रकाराणांपूर्वपूर्वाधिगमप्रकाराः आधाराः भवन्ति । यदि आप्तवाक्याधिगमप्रक्रियायाः गानेमहोदयस्य अनुक्रमाधिगमप्रक्रियया सह तुलना क्रियते तर्हि अध्येतुः स्वभावमाश्रित्य अधिगमःमार्गान्तरम् आश्रयति । अर्थात् अधिगमस्य क्रमः मनोगत्यात्मककौशलेभ्यः संज्ञानात्मकपुनारचनांप्रति (Psycomotor skills to Cognitive restructuring) प्रवर्ततेइति ।

कस्यचित् शासकस्य अथवा शिक्षकस्य मार्गदर्शने बाह्यशक्त्या वाजीवः सङ्केताधिगमेन (by signal learning) अधिगमप्रक्रियामारभते । विकासावस्थायां जीवः यदा समस्यां नाभिजानातिअथवाबौद्धिकस्तरे व्यवहारस्य समायोजने असमर्थःभवतितदा आप्तवाक्यं जीवस्य व्यवहारं सङ्केताधिगमतः समस्यासमाधानपर्यन्तं (Signal learning to problem solving) प्रभावयति । उदा– यदा बालेभ्यः सामाजिकव्यवहारान् शिक्षयामः तदाअधिगमः प्रायः सङ्केतात्मकः भवति । प्रौढानांविषये समस्यासमाधानात् सङ्केताधिगमपर्यन्तम् (Problem solving to signal learning)अधिगमः जायते । उभयत्राऽपि विश्लेषणात्संश्लेषणंतथासंश्लेषणात्विश्लेषणम्इति द्वयोरुपागमयोः कश्चन मार्गदर्शकःअपेक्षते ।

आप्तवाक्याधिगमे आप्तएव निर्णायको भूत्वाअधिगममार्गं निश्चिनोति । यदि जीवः समस्यासमाधानाय प्रशिक्षितः वर्ततेअथवापरिपक्वः वर्ततेतदाआप्तः व्यक्तिम् अवरोहणक्रमे (Problem solving to signal learning) प्रवर्तयति । यदि जीवःअपरिपक्वःअथवाप्रशिक्षणरहितःभवतितर्हिआप्तःतम्आरोहणक्रमे (Signal learning to problem solving) प्रवर्तयति । इत्थं गानेमहोदयस्य अधिगमसिद्धान्तापेक्षया आप्तवाक्याधिगमे अधिगमस्य मार्गदर्शनंसुस्पष्टं प्रतीयते ।

### १.२. आप्तवाक्याधिगमः तथा टोल्मन्महोदयस्य सप्रयोजनव्यवहारवादसिद्धान्तः ।

टोल्मन्महोदयः व्यवहारस्य संज्ञानात्मकतत्त्वानां प्रेरकप्रतिक्रियासंबन्धसिद्धान्तस्य च मध्ये समन्वयं साधितवान् । तस्य मते जीवस्य सर्वेऽपि व्यवहाराः सप्रयोजनाः (Purpossive) लक्ष्यकेन्द्रिताः (Goal oriented) वर्तन्ते । जीवः प्रेरक–प्रतिक्रिययोः सम्बन्धंनाधिगच्छति, परन्तुसमपूर्णपरिवेषं निरीक्ष्य (परिवेषेसर्वाणिप्रेरकाणि अवलोक्य) प्रतिक्रियासमूहमाचरति। इत्थंजीवःपरिवेषेविद्यमानसंपूर्णप्रेरकाणांमानचित्रंनिर्माति। एतदेवसःसंज्ञानमानचित्रम् (Cognitive map) इत्यभिवर्णयति। तस्य मतेजीवेषुअधिगमःनकेवलंप्रेरकप्रतिक्रियासंबन्धैः (S-R bonds) अपि तु संज्ञानमानचित्रैरपि (Cognative maps) जायते ।एतेनसः अधिगमस्य व्यवहारवाद–संज्ञानात्मकपक्षयोः मध्ये सामञ्जस्यं संपादितवान् ।

आप्तवाक्याधिगमेऽपि अधिगमसंबन्धिसंज्ञानमानचित्रस्य निर्माणंभवति, येन जीव:किञ्चित्अधिगच्छति। अर्थात् आप्तवाक्याधिगम: संपूर्णपरिवेषस्य संज्ञानमानचित्रस्य अवबोधने जीवाय साहाय्यम् आचरति ।

अधिगमपरिस्थितौजीव:कदाचित्लक्ष्यंजानाति, परन्तुलक्ष्यप्राप्तये किं कर्तव्यम् इतिनजानाति। यद्यपि स: प्रयतते कदाचित्मार्गभ्रष्ट:भवेत् । अथवा योग्यमार्गे वर्तमान:सन् लक्ष्यसाधनाय बहुसमयस्य शक्तेश्च दुर्व्ययं कुर्यात् । परन्तु आप्तवाक्याधिगमे आप्त: उद्देश्यानि स्पष्टीकृत्य तेषां प्राप्तये मार्गदर्शनंविदधाति । आप्त: जीवस्य संज्ञानमानचित्रस्य पुनस्संरचनया (Reorganisation of cognitive map) तस्य शारीरिकमानसिकशक्ते: अपव्ययं निवारयति । पुनश्च आप्तवाक्याधिगम: व्यक्तिनिष्ठ:, वस्तुनिष्ठश्च भवितुंशक्नोति ।

आप्तवाक्येऽपि सूक्ष्मव्यवहारस्य अवगमनेविश्वास:, अभिवृत्ति:, अभिरुचि:, अनुभूति: इत्यादय: व्यवहारस्य संज्ञानात्मकांशा: अन्तर्निहिता:वर्तन्ते । आप्तवाक्याधिगमसिद्धान्तस्य मुख्योद्देश्यं तावत् सूक्ष्मव्यवहारस्य अवबोधनम् । अस्मिन्अभिवृत्तीनांपरिवर्तनं सरलतया प्रभावतया च कर्तुं शक्यते। आचार्यस्य चेष्टा, शब्द:अथवा वाक्यं छात्रे संपूर्णव्यवहारपरिवर्तनं जनयति ।

## १.३. आप्तवाक्याधिगम: तथा पियाजेमहोदयस्य अधिगमसिद्धान्त: ।

पियाजेमहोदय: (Piaget) संज्ञानमनोविज्ञानीवर्तते । स: अधिगमप्रक्रियाया: व्याख्याने योजना (Schema), संयोजनम् (Accomidation), समीकरणम (Assimilation) इत्यादिसंप्रत्ययान् प्रतिपादितवान् । एते त्रय: मानसिककार्याणां संघटनंकुर्वन्ति । तत्र योजना नाम प्रपञ्चस्य प्रत्यक्षीकरणम्, अवबोधनं, चिन्तनञ्चभवति । संयोजनेन (by accomodation) समीकरणेन (by assimilation) च नूतनविषया: मानसिकयोजनायां प्रविशन्ति । एतेनजीव: समतौल्यस्थितिं (Equilibrium) प्राप्नोति । एवं मानसिकयोजनायां परिवर्तनेन समतौल्यस्थिते: संरक्षणस्य प्रक्रियैव अधिगम:इति जानपियाजे प्रतिपादयति ।

आप्तवाक्याधिगमेऽपि योजना, संयोजनं, समीकरणम् इत्येते त्रय: अन्तर्भवन्ति। यत: आप्तवचनेन जीवस्य मानसिकयोजनायां नूतनविषयप्रवेश: संभवति। इत्थम्आप्तोपदेशेनशब्दै:संज्ञानपुनस्संरचना (Cognitive Restructuring) संभवति । एवं विचार्यमाणे सति आप्तवाक्याधिगम: पियाजेमहोदयस्य सिद्धान्तादपिउत्कृष्ट:इतिवक्तुं शक्यते । यत: पियाजेमहोदयस्य मते संयोजनं समीकरणञ्चजीव: प्रयत्नेन साधयति, परन्तु आप्तवाक्याधिगमे केवलम्आप्तवचनैरैवशाब्दिकनिबन्धनेन अनायासेन अधिगम: जायते ।

## १.४. आप्तवाक्याधिगम: तथा ब्रूनरमहोदयस्य अधिगमसिद्धान्त: ।

ब्रूनर(ब्लूी) महोदयस्य मते व्यक्ते: संज्ञानात्मकविकासाय आप्तवाक्याधिगम: प्रमुखंस्थानंभजते । अधिगमप्रक्रियायां ज्ञानस्य संरचनाप्रधानाभवति। ययो: पदपदार्थयो: सम्बन्ध:नवर्तते, तयो: मानसिकसंरचनायां सम्बन्धकल्पनमेवअधिगमइति तस्याशय: । छात्राध्यापकयो: परिचर्चयैव बौद्धिकविकास: जायते । गतानुभवानाम्आधारेण, इन्द्रियै: प्राप्तपरिकल्पनानांपरीक्षणेन च ज्ञानप्राप्ति:भवति ।

आप्तवाक्याधिगमस्य ब्रूनरसिद्धान्तस्य च बहुसाम्यं वर्तते । अत्रबाह्यजगतिविद्यमानविषयस्य चयनं, विभेदीकरणं, निर्णयश्च प्रधाना:अंशा:भवन्ति । आप्तवाक्याधिगमेऽपि आप्त:विषयाणां सङ्कलनं कृत्वा जीवस्य मार्गदर्शनंकरोति । एवञ्च आप्तवाक्यं गतानुभवानांपरीक्षणं संयोजनञ्च करोति । यत: आप्त: छात्रस्यापेक्षया ज्ञानी, अनुभवज्ञ:, अन्तर्दृष्टिसहित:, निर्णयशक्तिमान् च वर्तते । अत:छात्र: कस्मिंश्चित् विषये स्वानुभवस्य आप्तानुभवस्य च लाभमाप्नोति । इत्थं छात्राध्यापकयो: मध्ये परिचर्चाअथवासंप्रेषणंछात्रेषुबौद्धिकविकासं जनयति इतिब्रूनर महोदयस्याभिप्राय: स्पष्टं प्रतीयते ।

**निष्कर्ष**:-पाश्चात्या: विविधेषु पशुपक्ष्यादिषु प्रयोगान् कृत्वाअधिगमसिद्धान्तान् रचयामासु:। एतेषांसिद्धान्तानमवबोधने कार्यान्वयने च शिक्षका:महत्कष्टमनुभवन्ति। अत: भारतीयदर्शनान्याश्रित्य रचित: आप्तवाक्याधिगमसिद्धान्त: अस्माकंदेशेअनुकूलाभवितुमर्हति।तत्रआप्तोनाम

***''प्रकृतवाक्यार्थविषयक-यथार्थज्ञानप्रयोज्यशब्दोच्चारणकर्ताआप्त:''***

इति न्यायसिद्धान्त-मुक्तावलीव्याख्याने रामरुद्रीये प्रतिपादितम्। तच्च आप्तवाक्यं श्रोतु: ज्ञानेभावे क्रियायाञ्च परिवर्तनमानेतुंसमर्थोभवति। उक्तञ्च -

**इदमन्धतम:कृत्स्नं जायेत भुवनत्रयम् ।**

**यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।।**

**सन्दर्भग्रन्थसूची**

१) गुप्ताएस्, पींगुप्ताअलका, (२०१८) उच्चतरशिक्षामनोविज्ञान, शारदापुस्तकभवन, इलहाबाद ।

२) बुलुसु,पद्ममित्रश्रीनिवास(२०१२) शिक्षाया: मनोवैज्ञानिकाधारा:, राज्यस्थानसंस्कृतपुस्तकालय, जयपुर ।

३) लताएन्, (२००२), आप्तवाक्यम् - एक: विशिष्टाधिगमव्यूह:, अप्रकाशितशोधप्रबन्ध:, तिरूपति: ।

४) Hergenhahn B.R. & Olson M.W. (2008) An introduction to Theories of Learning, Prentice Hall of India Private Limited, new Delhi.

५) PHilgard, E.R. (2007) Theories of Learning, Surjeet Publications, Delhi.

६) Peri,Subbarayan (2000) Learning by Aptavakyam, Paniniyam Publications, Tirupati.